अथ स्कन्दब्रह्माण्डपुराणयोरन्तर्गतशनिस्तोत्राणि :—

1. अथ शनिषोडशनामस्तोत्रम् :—

कोणः शनैश्चरो मन्दः छायाहृदयनन्दनः,
मार्तण्डजः सुधासौरिर्नीलवस्त्रांजनद्युतिः।
अब्राह्मणः क्रूरः क्रूर – कर्मातंकीग्रहनायकः,
कृष्णो धर्मानुजः शान्तः शुष्को दारावरप्रदः।।

2. अथ शनिदशनामस्तोत्रम् :—

कोणस्थः पिंगलो बभ्रूः कृष्णो रौद्रोऽन्तको यमः।
सौरिः शनैश्चरो मन्दः पिप्पलादेन संस्तुतः।।

3. अथ दशरथकृतशनिस्तोत्रम् :—

ऊँ अस्य श्रीशनैश्चरस्तोत्रस्य दशरथ ऋषिः, शनैश्चरो देवता,
त्रिष्टुपछन्दः, शनैश्चरप्रीत्यर्थे विनियोगः।

कोणोऽन्तको रौद्रो यमोऽथ बभ्रूः, कृष्णः शनिः पिंगलो मन्दः सौरिः।
नित्यं स्मृतो यो हरते च पीडां, तस्मै नमः श्रीरविनन्दनाय।। 1।।

सुरासुरकिंपुरुषोरगेन्द्राः गन्धर्वविद्याधरपन्नगाश्च।
पीड्यन्ति सर्वे विषमस्थितेन तस्मै नमः श्रीरविनन्दनाय।। 2।।

नरा नरेन्द्रा पशवो मृगेन्द्रा वन्याश्च ये कीटपतंगभृंगाः।
पीड्यन्ति सर्वे विषमस्थितेन तस्मै नमः श्रीरविनन्दनाय।। 3।।

देशाश्च दुर्गाणि वनानि यत्र सेनानि वेशाः पुरपत्तनानि।
पीड्यन्ति सर्वे विषमस्थितेन तस्मै नमः श्रीरविनन्दनाय।। 4।।

तिलैर्यवैर्माषगुडान्नदानै र्लोहेन नीलाम्बरदानतो वा।
प्रीणाति मन्त्रैर्निजवासरे च तस्मै नमः श्रीरविनन्दनाय।। 5।।

प्रयागकूले यमुनातटे च सरस्वतीपुण्यजले गुहायां।
यो योगिनां ध्यानगतोऽपि सूक्ष्मस्तस्मै नमः श्रीरविनन्दनाय।। 6।।

अन्यप्रदेशात्स्वगृहं प्रविष्टास्तदीयवारे स नरः सुखी स्यात्।
गृहाद्गतो यो न पुनः प्रयाति तस्मै नमः श्रीरविनन्दनाय।। 7।।

स्रष्टा स्वयम्भूर्भुवनत्रयस्य त्राता हरीशो हरते पिनाकी।
एकस्त्रिधा ऋग्यजुःसाममूर्तिस्तस्मै नमः श्रीरविनन्दनाय।। 8।

शन्यष्टकं यः प्रयतः प्रभाते नित्यं सुपुत्रैः पशुबान्धवैश्च।
पठेत्तु सौख्यं भुवि भोगयुक्तः प्राप्नोति निर्वाणपदं तदन्ते।।9।।

कोणस्थः पिंगलो बभ्रूः कृष्णो रौद्रोऽन्तको यमः।
सौरिः शनैश्चरो मन्दः पिप्पलादेन संस्तुतः।। 10।।

एतानि दशनामानि प्रातरुत्थाय यः पठेत्।
शनैश्चरकृतपीडा न कदाचिद्भविष्यति।। 11।।

Created by demo-version of Universal Document Converter. Full version doesn't add this stamp.
WWW.PRINT-DRIVER.COM

4. <u>अथ पद्मपुराणान्तर्गत दशरथकृतशनिस्तोत्रम्</u> :–

ध्यात्वा सरस्वतीं देवीं गणनाथं विनायकं।
राजा दशरथः स्तोत्रं सौरेरिदमथाकरोत्।। 1।।

नमो नीलमयूखाय नीलोत्पलनिभाय च।
नमो निर्मांसदेहाय दीर्घश्मश्रुजटाय च।। 2।।

नमो विशालनेत्राय शुष्कोदर भयानक।
नमः परुषगात्राय स्थूलरोमाय वै नमः।। 3।।

नमो नित्यक्षुधार्ताय नित्यातृप्ताय वै नमः।
नमः कालाग्निरूपाय कृतान्तक नमोऽस्तु ते।। 4।।

नमस्ते कोटरक्षाय दुर्निरीक्ष्याय वै नमः।
नमो घोराय रौद्राय भीषणाय करालिने।। 5।।

नमस्ते सर्वभक्ष्याय वालीमुख नमोऽस्तु ते।
सूर्यपुत्र नमस्तेऽस्तु भास्करि भयदायक।। 6।।

अधोदृष्टे नमस्तुभ्यं वपुःश्यामा नमोऽस्तु ते।
नमो मन्दगते तुभ्यं निस्त्रिंशाय नमो नमः।। 7।।

तपसा दग्धदेहाय नित्यं योगरताय च।
नमस्ते ज्ञाननेत्राय कश्यपात्मजसूनवे।। 8।।

तुष्टो ददासि वै राज्यं रुष्टो हरसि तत्क्षणात्।
सूर्यपुत्र नमस्तेऽस्तु कृष्णांगाय च वै नमः।। 9।।

देवासुरमनुष्याश्च पशुपक्षीसरीसृपाः।
त्वया विलोकिताः सौरि दैन्यमाशु व्रजन्ति ते।। 10।।

ब्रह्मा शक्रो यमश्चैव ऋषयः सप्ततारकाः।
राज्यभ्रष्टाश्च ते सर्वे तव दृष्ट्वा विलोकिताः।। 11।।

देशा नगरग्रामा द्वीपाश्चैवाद्रयस्तथा।
रौद्रदृष्ट्वा तु ये दृष्टाः क्षयं गच्छन्ति तत्क्षणात्।। 12।।

सौरे क्षमस्वापराधं सर्वभूतहिताय च।
प्रसादं कुरु मे सौरे वरार्थेऽहं तवाश्रितः।। 13।।

एवं स्तुतस्तदा सौरि ग्रहराजो महाबलः।
अब्रवीच्च शनिर्वाम्यः हृष्टरोमा च पार्थिव।। 14।।

तुष्टोऽहं तव राजेन्द्र स्तोत्रेणानेन सुव्रत।
एवं वरं दास्यामि यत्ते मनसि वर्तते।। 15।।

गोचरे जन्मकाले वा दशास्वन्तर्दशासु च।
यः पठेद् द्वित्रिसन्ध्यं वा शुचिर्भूत्वा समाहितः।। 16।।

Created by demo-version of Universal Document Converter. Full version doesn't add this stamp.
WWW.PRINT-DRIVER.COM